अरिष्टमेकमेव स्याद्विररिष्टं शुभावहम् ।
अन्योन्यमशुभं हन्याद्विषस्य हि विषं यथा ॥
एकमारभ्य सप्तान्तमरिष्टं प्राह नान्यथा।
यथोत्तरं द्विगुणितं फलमाहुर्मनीषिणः ॥
इति खड्गपरीक्षायामरिष्टाध्यायः षष्ठः ॥*॥
अथ द्विविधा भूमिः ।
दिव्यभौमविभागेन भूमिर्या द्विविधा मता ।
दिव्या दिवि समुद्भूता भौमा भूमिसमुद्भवा ॥
तल्लक्षणसमेषेण लिख्यते तन्निबोधत ।
देवदानवयोर्मध्ये खड्गवृष्टिरभूत् पुरा ॥
ते खड्गाः पुण्यदेशेषु केषु केषु प्रतिष्ठिताः ॥
दिव्यलक्षणं यथा,—
ये खड्गाः स्थूलधारा भृशमतिलघवो निर्म्म-
लाङ्गाः सुनेत्रा
ये रिष्टाख्यस्वरूपाः सुविमलतनवस्त्याप्यसंस्कार-
योगात् ।
दुर्भेद्या दुर्घटाश्च ध्वनिगुणगुरवो यत्सहते दाह-
पाकौ
ते दिव्याः कुर्व्वतेऽमी कुलधनविजयश्रीयशो-
वृद्धिमाशु ॥१॥
अथ भौमलक्षणं हृद्दारीते ।
पूर्व्वं महेशेन विषाणि यानि
भुक्तानि तेषां पतितास्तु बिन्दवः ।
यस्मिन् प्रदेशे स स एव देशः
कालायसामाकरतां जगाम ॥
पुरामृतं क्षीरसमुद्रमध्या-
दुत्पाद्य संगृह्य ययुः सुरेन्द्राः ।
तद्विन्दवो यत्र निपेतुरेष
शुद्धायसामाकरतां जगाम ॥
ये विषोत्था भृशङ्काला: खराङ्गाः सम्भवन्ति हि ।
मूर्च्छादाहज्वरानाहशोकहिक्कावमीकराः ॥
येऽमृतोत्थाः कर्व्वुराङ्गा मन्दाङ्गाः संभवन्ति च।
वलीपलितमालिन्यजराव्याधिविनाशनाः ॥
यत्रैव पतितं यत्तु तत्तदाकरताङ्गताः ॥
तद्यथा,—
वाराणसीमगधसिंहलभूमिभागे
नेपालभूमिषु तथाङ्गमहीप्रदेशे ।
सौराष्ट्रिकेऽन्यतरधन्यमहीविभागे
शुद्धायसां क्षितिवराः प्रवदन्ति जज्ञाः ॥
तद्यथा,—
वाराणसेयाः सुस्निग्धास्तीक्ष्णधाराः सदङ्गिनः ।
लघवः सुखसन्धेया ज्ञेयाश्छेद्यशालिनः ॥
मागधाः कर्कशाः स्थूलधारा गूढतराङ्गिनः ।
गुरवो दुःखसन्धेयाः खड्गा ज्ञेया विचक्षणैः॥
नैपालदेशप्रभवा निरङ्गा निश्चलाश्च ये ।
ज्ञेयाः सदङ्गा मलिना लघवः स्थूलधारिणः ॥
कालिङ्गा गुरवः स्वच्छा यत्नाङ्गास्तनुदेहवः ।
सौराष्ट्रा निर्म्मलाः स्निग्धाः सुयत्नाङ्गा भृशं
खराः ॥
सिंहलद्वीपजातानां चतुर्द्धा भेद उच्यते ।
केचित् सदङ्गा गुरवः कर्कशाः स्निग्धधारिणः ॥
केचित् सदङ्गा लघवः सुस्निग्धा स्थूलधारिणः।

एषां रूपेण मिश्रेण ज्ञेया हि द्विजजातयः ॥
सामान्यात् द्विगुणश्चौड्रं कालिदेशगुणस्ततः ।
कवेः शतगुणं भद्रं भद्राद्वज्रं सहस्रधा ।
वज्रात् षष्ठिगुणः पाण्डिर्निरविर्दशभिर्गुणैः ।
ततः कोटिसहस्रेण ह्ययस्कान्तः प्रशस्यते ॥”
इत्यादिकं रसायनौपयौगिकमेव न तु खड्गे
दृष्टफलम् ॥ यदाह ।
व्यासान्तु लौहजातीनां वक्ष्ये खड्गाय युज्यते।
तथाच ।
ये खड्गास्तीक्ष्णधारा भृशमतिगुरवः षड्-
गुणाढ्याः सुभेद्याः
केचित् साङ्गा निरङ्गाः क्वचि च न समला
निर्म्मलाः केचिदेव ।
ते भौमाः कुर्व्वतेऽमी धनविजयवलं षड्गुणा
निर्गुणा वा
ते दुःखं शोकमुग्रं दधति बलकुलश्रीयशोनाश-
कास्ते ॥
इति खड्गपरीक्षायां भूम्यध्यायः सप्तमः ॥२*॥
अथाष्टधा ध्वनिः ।
ध्वनिरष्टविधः प्रोक्तो यः पूर्व्वं खड्गसंग्रहे ।
तेषामपि लिखाम्यत्र सगुणं लक्षणाष्टकम् ॥
तद्यथा,—
पूर्व्वं चत्वारः शुभदाः परे निन्द्यास्सदास्तथा।
विचार्य्य खड्गमानञ्च कर्त्तव्यं खड्गकोविदैः ॥
घोरस्तार इति ख्यातो द्विविधः खड्गकोविदैः।
घोरः स्याद् सुखसम्पत्त्यै तार उच्चाटने मतः ॥
यत्र हंसरवस्येव खड्गे नखहते ध्वनिः ।
हंसध्वनिरयं खड्गः सकलार्थप्रसाधनः ॥१॥
कांस्यशब्द इवाभाति यस्मिन् खड्गे हते ध्वनिः।
कांस्यध्वनिरयं खड्गः प्राह नागार्ज्जुनो
मुनिः ॥२॥
अश्वस्य लक्षणं पतितम् ॥३॥
ढक्काशब्द इवाभाति यस्मिन् खड्गे हते ध्वनिः।
ढक्काध्वनिरयं खड्गः सर्व्वशत्रुनिसूदनः ॥४॥
काकस्वर इवाभाति यस्मिन् खड्गे हते ध्वनिः।
काकस्वरोऽयं खड्गः स्यात् श्रीयशःकुल-
नाशनः ॥५॥
तन्त्रीस्वरसमो यस्मिन् भवेत् खड्गे हते ध्वनिः।
तन्त्रीध्वनिरयं खड्गः कुलश्रीधननाशनः ॥६॥
खरस्येव ध्वनिर्यस्मिन् खरध्वनिरयं मतः ।
श्रीयशोज्ञानविज्ञानजयतेजोविनाशनः ॥७॥
प्रस्तरस्येव यः खड्गः स निन्द्यः खड्ग-
लक्षणे ॥८॥
गभीरतारध्वनिता खड्गस्याशुभलक्षणम् ।
उत्तानमन्द्रध्वनिता खड्गस्याशुभलक्षणम् ॥
अपाङ्गनेत्रहीनोऽपि खड्गः सुध्वनिरुत्तमः ।
अन्धः कुरूपो मनुजो यथा भुवि सुगायनः ॥
सर्व्वलक्षणसम्पन्नः खड्गो यो ध्वनिवर्ज्जितः ।
स निन्द्यः सुन्दराङ्गोऽपि यथा वाक्यविवर्जितः ॥
नखेन वाथ दण्डेन तथा लौहशलाकया ।
लोष्टेन शर्कराभिर्व्वा ध्वनिविज्ञानमुच्यते ॥”
इति खड्गपरीक्षायां ध्वन्यध्यायोऽष्टमः ॥*॥

अथ द्विविधं मानम् ।
यन्मानं द्विविधं प्रोक्तं तस्य लक्षणमुच्यते ।
उत्तमाधमभेदेन भेदो हि द्विविधो मतः ॥
उत्तमं यद्विशालं स्याल्लघुमानं प्रकीर्त्तितम् ॥१॥
अधमं तच्च यत् खर्व्वं गुरुमानं प्रकीर्त्तितम् ॥२॥
तत्पुनस्त्रिविधं प्रोक्तमादिमध्यान्तभेदतः ।
यो मुष्टिविंशतिसमायततीव्रधारो
भर्त्तुर्भवेत् प्रसरतोऽपि षडङ्गुलीभिः ।
मानेन चाष्टपलिकः स हि खड्गमध्ये
नातिप्रकृष्टनिकृष्टफलप्रदः स्यात् ॥
यो द्वादशाष्टनवमुष्टिभिरायतः स्यात्
मन्दो भवेत् प्रसरतोऽपि चतुर्थभागः ।
तावत्पलैः परिमितस्तु ततोऽधिको वा
खड्गाधमो धनयशःकुलनाशनाय ॥
नागार्ज्जुनोऽपि ।
यावन्तो मुष्टयो दैर्घ्ये तदर्द्धाङ्गुलयो यदा ।
प्रसरे तच्चतुर्थांशमितिश्चे मानमुत्तमम् ॥
यावन्तो मुष्टयो दैर्घ्ये प्रसरे तत्त्रिभागिकः ।
पलैस्तदर्द्धैस्तुलितः स खड्गो मध्य उच्यते ॥
यावन्तो मुष्टयो दैर्घ्ये तुर्य्यांशः प्रसरे तु तत् ।
अधमः कीर्त्तितः खड्गस्तत्समो वाधिकः
पलैः ॥
भौमानामिदमुद्दिष्टं दिव्यास्तु लघवो मताः ॥”
इति खड्गपरीक्षायां मानाध्यायः ॥ * ॥
भोजस्तु ।
“दीर्घता लघुता चैव स्वरविस्तीर्णता तथा ।
दुर्भेद्यता सुघटता खड्गानां गुणसंग्रहः ॥
खर्व्वता गुरुता चैव मन्दता तनुता तथा ।
सुभेद्यता दुर्घटता खड्गानां दोषसंग्रहः ॥
इति निखिलमुदारमुक्तमत्र
बहुतन्त्रेषु निरूप्य खड्गयष्टेः ।
नृपतिरिति विचिन्त्य यो विधत्ते
स चिरतरां श्रियमूर्ज्जितां लभेत ॥”
इति युक्तिकल्पतरूक्तखड्गपरीक्षा समाप्ता ॥
तरसं, क्ली, (तॄ + बाहुलकात् असच् ।) मांसम् ।
इत्यमरः । २ । ६ । ६३ ॥ (यथा, कात्यायन-
श्रौतसूत्रे ।
“तरसमयाः पूर्व्वोक्तभागाः ॥”
“तरसमया मांसमयाः ।” इति कर्कः ॥)
तरस्थानं, क्ली, (तराय अवतरणाय यत् स्थानम् ।
तरस्य स्थानं वा ।) घट्टः । इति जटाधरः ॥
तरस्वान्, [त्] त्रि, (तरो बलं वेगो वा अस्य-
स्येति मतुप् । मस्य वः ।) शूरः । वेगी ।
इति व्याकरणम् ॥ (चतुर्थमनुपुत्रविशेषः ।
यथा, हरिवंशे । ७ । ८८ ।
“तरङ्गभीरुर्ब्बुधश्च तरस्वानुग्र एव च ।
अभिमानी प्रवीरश्च जिष्णुः सङ्क्रन्दनस्तथा ॥”)
तरस्वी, [न्] त्रि, (तरो वेगः बलं वास्यस्य ।
तरस् + “अस्मायामेधास्रजो विनिः ।” ५।२।
१२१ । इति विनिः ।) शूरः । वेगी । इत्यमरः ।
३।३।१२७। (यथा, भागवते । ८ । १० । ३१ ।
“राहुणा च तथा सोमः पुलोम्ना युयुधेऽनिलः ।